# पुराणेषु जलविज्ञानम्

**डॉ. पारमिता पण्डा**
**सहाचार्या, पुराणेतिहासविभागः,राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

**Article Info**
Volume 5, Issue 5
Page Number : 15-17
**Publication Issue :**
September-October-2022
**Article History**
Accepted : 03 Sep 2022
Published : 10 Sep 2022

**सारांशः** – संस्कृतसाहित्ये प्रकृतेः स्वरूपं विविधेषु प्रकारेषु वर्णिताः वर्तन्ते। पुराणेषु प्रथामा सृष्टिः जलमिति उक्तमस्ति। **'जलं विना जीवनं'** नास्ति। अतः मया एतत्सर्वं मनसि निधाय जलविद्यायाः क्षेत्रे, विशेषतः भैषज्यरूपेण व्यवहारे, जलस्य स्त्रोतसां क्षीणतायाः अपाकरणम् इत्यादिविषये किमपि लेखनं कर्तव्यमिति धीया एषः शोधलेखः मया सारल्येन अत्र विचारितः।

**विशेषशब्दाः** – जलस्यदीपनशक्तिविषये, मेघा, तुषारवृष्टिः, जलीयबाष्पस्था, तुषारमूला, घनीभवनवाष्पी, जलस्त्रोतसां वृद्धेरुपायः, वर्षाकारकः मेघः इत्यादयः।

अस्माकं शास्त्रेषु पुराणेषु तथा अन्यस्मिन् वाङ्मये च निहितं निगुढं च शास्त्रविज्ञानमपारमिति वयं जानीमः। तस्य प्रकाशाय प्रचाराय च समयोऽयं संप्राप्त इति तस्यां दिशि सर्वैः अस्माभिः चिन्तनीयम्। अतः आवश्यकता विद्यते यत् संस्कृते अनुसन्धानानां नवीनक्षेत्राणाम् अन्वेषणं भवेत्, सैद्धन्तिकविचाराणां प्रायोगिकानुसन्धानव्यवस्था भवेत्। एतेन देशस्य महान् उपकारः भविष्यति। भारतमपि पुर्वविकसितदेशानां सरिणषु सर्वस्मिन् क्षेत्रे स्वीयं विशिष्टं स्थानं प्राप्स्यति। एतत् सर्वं मनसि निधाय अत्र जलविद्यायाः क्षेत्रे, विशेषतः भैषज्यरुपेण व्यवहारे, जलस्य स्त्रोतसां क्षीणतायाः अपाकरण विषये अनुसन्धानस्य दिशः चिन्तनं विधीयते।
संस्कृतसाहित्ये किमस्त्यमुमधिकृत्यविषयम् ? इति विचार्यमाणे तु वर्णनप्रधाने संस्कृतसाहित्ये वनोपवनपर्वतजलाशयादिनैसर्गिकानां वस्तुनां वर्णनं प्राचुर्येणोपलभ्यते। यदद्यत्वे तक्लयितुमप्यशक्यं तादृशस्यनिर्मलस्य जलस्य वायोश्चोपभोगः तदानीं क्रियते स्मेति निरीक्ष्यताम् द्वित्रैः श्लोकैः –

**इत्थं शरत् स्वच्छजलं पद्माकरसुगन्धिना।**
**न्यविशद् वायुना वातं सगोगोपालकोऽच्युतः।।**[1]
**न तज्ज्लं यत्र सुचारुपङ्कजं, न पङ्कजं तद् यदलीनषट्पदम्।।**
**न षट्पदोऽसौ न जुगुशुं यः कलं**
**न गुज्जितं तन्न जहार यन्मनः।।**

जलस्यदीपनशक्तिविषये, शोधनशक्तिविषये, तेजसः आधानविषये च अथर्ववेदे गंभीरं वैज्ञानिकं चिन्तनं भारतीयवेदविज्ञानस्य सूक्ष्मनिरीक्षणशक्ति स्पष्टतः प्रथयति। जलं नूनं भयनिवारकं, पीडानाशकं च। अत्यधिक विशिष्टतापहेतोः एतेस्य उपयोगः उदरपीडायां व्रणादीनां सेकेऽपि जायते। विविधप्रकारकजलानां भैषज्यगुणा अपि विविधाः भवन्ति। आश्विनमासस्य जलं मूर्छावमनमूत्राघातहृदयदाहादिरोगाणामपाकरणे क्षमं भवति, जले वृद्धिं करोति, हृदये शक्तिञ्च स्थापयति। आकाशात् पतिते

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

करकाजले शिर:शूलविनाशकत्वम्, उदरदाहनाशकत्वं च तिष्ठति। तुषारकण प्राप्तं जलं कण्ठरोगाणां, प्रमेहकुष्ठादिरोगाणां च नाशकं तिष्ठति। कृमिविकारमपि दूरी करोति। हिमालयं प्राप्तं जलं रक्तपित्तविकृतिं हृदयविकृतिं च अपाकरोति। सर्वप्रकारकम् उष्ण जलं वातविकारे, कफविकृतिं निवारयति, पाचकत्वमपि निदधाति। उष्णं कृत्वा पुन: शैत्यमापन्नं जलं विशेषत: पाचनक्रियां वर्द्धयति, सर्वथा शीतलं जलन्तु पित्तनाशकं भवति। एवमेव हिमालय: प्रभवन्तीनां नदीनां जलं प्रस्तरखण्डै: आघातितं सत् पवित्रं, स्वादिष्टं, विविधरोगविघातकं भवति। मलयगिरे: नि:सृततानां नदीनामपि जलं प्रस्तरखण्डै: बालुकाभिश्च सम्पृक्तिमेत्य विशुद्धममृतोपमं च जायते। किन्तु विन्ध्याद्रित: निर्गच्छत् नदीजलं मस्तिष्कहृदय चर्मरोगकृष्ठरोगाणां वाहकं भवति। सुश्रुतसंहिता तु मलयाद्रिनि:सृतं जलं संक्रामकरोगाणां जनकं कथयति।हारीतमते मरूभूमिजलं लघु, स्वादु सर्वरोगविनाशकं च भवति।

पुराणोक्तवर्णनानुसारम् अत्रैव प्रवहाख्ये मण्डले भूपृष्ठत: परिव्यापृते मेघा इतस्तत: परिभ्रमन्ति। अतो मण्डलमिदं मेघण्डलमिति ज्ञायते। स्कन्दपुराणोक्तवचनं तथा –

**पृथिवीं समभिक्रम्य संस्थितो मेघमण्डले।**

**प्रवहो नाम यो मेघान् प्रवहत्यतिशक्तिमान्।।**[2]

पुराणेषु तुषारवृष्टेरपि उल्लेखनमस्ति। वायुमण्डलस्थानां जलीयबाष्पाणां यदा घनी भवनं जायते तदा यदि तन्मण्डलमतीव शीतं विद्यते अर्थात् उष्णताया अतिमात्रं ह्रासो भवति तदा जलीयबाष्पस्था: आर्द्रभागा : हिमाकारेण शिली भवन्ति। ब्रह्माण्डरपुराणे उक्तमस्ति यत् हिमवत: उत्तरदिग्वर्तिनि पौण्ड्रनगरे या वृष्टिर्भवति सा तुषारमूला। यथा हि पुंड्रं नाम समाख्यातं नगरं तत्र विस्तृतम्। तस्मिन्निपतितं वर्षं ब्रह्माण्डपुराणादपि अधिगम्यते –

**तत्तुषारसमुद्भवम्।।**[3]

**पर्जन्यो दिग्गजाश्च हेमन्ते शीतसम्भवा:।**

**तुषारवृष्टिं वर्षन्ति शिष्टा: शस्यप्रवृद्धये।।**[4]

भूगोलशास्त्रे या अध: क्षेपणप्रक्रिया वर्णिता विद्यते। तस्या: प्रक्रियाया एव प्रकारविशेष: एते – वृष्टिपात:, हिमपात: इत्यादय:। जलीयवाष्पस्थानाम् आर्द्र भागानां वृष्टिपात–हिमपात–शिला–वृष्टिपातरुपै: भुवि पतनमेव अध: क्षेपणमिति ज्ञायते। घनीभवनवाष्पी भवनप्रक्रिययोरपि सम्यगालोचनं विधीयते पुराणसाहित्ये। जलीयवाष्पानां यदा जले रुपान्तरं भवति सैव घनीभवनप्रक्रियेति ज्ञातव्या। तडागनदीसागरादिजलानां जलीयबाष्परुपेणोद्गमनं भवति सूर्यरश्मिना। अतएव सीर्य: वारितस्कर इति कथ्यते ब्रह्माण्डपुराणे। तत्रैव पुनरुच्यते –

**सूर्य: किरणजालेन वायुयुक्तेन सर्वश:।**

**जगतो जलमादत्ते कृत्स्नस्य द्विजसत्तमा:।।**[5]

कृत्स्नस्य जगत: जलमादत्ते सूर्य: इति कथनेन न केवलं नदीसागरादीनामेव जलाकर्षणं सूच्यते परन्तु सूर्य: समग्रस्यैव जगतो जलमादत्ते इति बुध्यते। तदनन्तरं वायुनां परिचालिता: सन्त: सूर्यरश्मयस्ता आप: ऊर्ध्वं वहन्ति इति स्पष्टं कीर्त्यते। ब्रह्माण्डपुराणोक्तवचनमपि उल्लेखार्हं विद्यते प्रसङ्गेऽस्मिन् –

**सूर्य एव तु वृष्टीनां स्त्रष्टा समुपदिश्यते।**

**सूर्यमूला च वै वृष्टिर्जलं सूर्यात् प्रवर्तते।।**[6]

संस्कृतवाङ्मये जलस्त्रोतसां वृद्धेरुपाय: पदर्शित: तिष्ठति। यज्ञसाधनहेतो: वर्षा भवति, एतस्य सङ्केत: वेद मन्त्रेषु सुतरां प्राप्यते। यज्ञै: वायु उत्पद्यते, वायु, मेघरुपेण परिणमते, मेघानां परस्परसंघर्षणेन विद्युत् उत्पद्यते, पुनश्च जलं वर्षति। यज्ञे एकत्र

उल्लेख: वर्तते यत् यज्ञे प्रदत्तं हवि: सूक्ष्मरुपेण सूर्य किरणै: द्युलोकं प्राप्नोति, तत्र मेघै: सम्पृक्तिमेत्य जलरुपं लभते, वर्षणकर्मणा पुन: वृथ्वीमेति, सर्वत्र जलप्लावनं जायते पर्जन्येष्टियज्ञस्य उद्देश्य वर्षा प्राप्तिरेव।

**कृष्णे नियानं हरय: सुपर्णा**

**अपो वसाना दिवमुत्पतन्ति।।**[7]

**मरुता पृषतीर्गच्छ, वशापृश्निर्भूत्वा दिवंगच्छ ततो नो वृष्टिमावह।।**[8]

इत्यादिषु मन्त्रेषु अयमेव सङ्केतो लभ्यते। यज्ञादे: य: धूम: उत्थित: भवति, स। सूर्यकिरणानां प्रभवै: उपरि गत्वा विद्युत्कणारूपेण परिवर्तिता भवति, घनीभूतं भूत्वा मेघत्वं लभते। वर्षाकारक: मेघ एव मुख्यं जलस्त्रोत:, अत: यज्ञानां बाहुल्येन यदि विधानं भवेत् तदा जलस्त्रोत: वृद्धिं प्राप्नुयात्। समुद्रस्य जलं भवेत् अथवा यस्मिन् कस्मिन्नपि स्थाने जलं भवेत् तस्य जलस्य शोधनोपाय: यदि सरल: भवेत् तदा जलसङ्कट: दूरीकर्तुं शक्य:।

एवं पुराणकाले भारतवर्षे एवैतासां भौगोलिकधारणानां सम्यग् बोधनमासीदिति सुष्ठु परिलक्ष्यते। वर्तमानकाले भूगोलशास्त्रस्य यानि तथ्यानि निरुपितानि सन्ति तानि पुराणेषु उपलभ्यन्ते। एतदर्थमेतन् निर्णेतुं शक्यते यद् भूगोलशास्त्रस्य आधारग्रन्थरुपेण अस्ति पुराणानां महानुपयोग:।

**सन्दर्भग्रन्थसूची**

1. श्रीमद्भागवतमहापुराणे
2.स्कन्दपुराणम्, 1.2.38.53
3. ब्रह्माण्डपुरामम्, 1.2.22.53.48
4. ब्रह्माण्डपुराणम्, 1.2.22.49
5. ब्रह्माण्डपुराणाम्, 1.2.22.49
6. ब्रह्माण्डपुराणम्,1.2.22.57.58
7. ऋग्वेद: - 1.52.9
8. यजुर्वेद: - 2.16

**सहायकग्रन्थसूची**

1. ब्रह्माण्डपुराणम्, गोरखपुर, गीताप्रेस
2. ब्रह्माण्डपुराणम्, चौखम्बाप्रकाशन, वाराणासी श्रीमद्भागवतम्, चौखम्बा पब्लिकेशन, दिल्ली
3. ब्रह्माण्डपुराणम्, नागपब्लिसर्स, दिल्ली